## षष्ठ: अनुच्छेद:

श्रीमद्भगवद्गीता वस्तुत: महाभारतस्य अंश: अस्ति । अर्जुन: युद्धे आत्मीयान् विलोक्य युद्धविमुख: अभवत् । तदा भगवान् श्रीकृष्ण: अर्जुनम् उपदिशति स्म । भगवत: श्रीकृष्णस्य उपदेशस्य नाम श्रीमद्भगवद्-गीता । श्रीमद्भगवद्गीता उपनिषदां सार: भवति । अत्र अनेके विषया: वर्णिता: सन्ति । प्राधान्येन अस्यां भक्तियोगस्य ज्ञानयोगस्य कर्मयोगस्य च प्रतिपादनं कृतम् । अत्र भगवद्गीतायां भक्तिज्ञानकर्मयोगानां त्रिवेणी प्रवहति । अत: प्रसिद्धं कथनं वर्त्तते-

''गीता सुगीता कर्त्तव्या किमन्यै: शास्त्रविस्तरै: ।''

प्रत्येकं मानव: सुखं कामयते । सुखं प्राप्तुं त्रय: मार्गा: निर्दिष्टा: सन्ति- भक्ति: ज्ञानं कर्म च । अत: भक्त: ज्ञानी कर्मशील: प्रत्येकं मानव: श्रीमद्भगवद्गीताया: अध्ययनेन कल्याणं कर्त्तुं शक्नोति । एषु त्रिषु मार्गेषु अपि कर्मयोग: आधुनिकयुगे सुतरां कल्याणं करोति । कर्मयोग: जीवने संघर्षस्य उपदेशं प्रयच्छति । कर्म मानवस्य धर्म: । परं कर्म तदेव कल्याणकरं यस्मिन् फलस्य इच्छा न भवेत् । भगवान् श्रीकृष्ण: स्पष्टम् उक्तवान्-

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।

### प्रश्ना:

1. **एकेन वाक्येन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

   (क) श्रीकृष्ण: स्पष्टं किमुक्तवान् ?

   (ख) आधुनिकयुगे किं कल्याणकरम् ?

   (ग) गीतायां का त्रिवेणी प्रवहति ?

2. **एकेन पदेन संस्कृतभाषया मातृभाषया वा उत्तरं लिखत ।**

   (क) प्रत्येकं जन: किं कामयते ?

   (ख) युद्धे अर्जुन: कान् दृष्ट्वा युद्धविमुख: अभवत् ?

   (ग) का उपनिषदां सार: अस्ति ?

   (घ) क: मानवस्य धर्म: ?

●●●